## गुपेश्छन्दसि (५०/३४०४)

गुपेः परस्य च्लेः छन्दसि विषये विभाषा चङ आदेशो भवति। यत्र आयप्रत्ययो नास्ति तत्रायं विधिः। '[1]इमान् मे मित्रावरुणौ गृहानजुगुपतम् युवम्' (मै. १.५.१४)। [2]अगौप्तम्, अगोपिष्टम्, अगोपायिष्टम् इति वा। भाषायां तु चङन्तं वर्जयित्वा शिष्टं रूपत्रयं भवति॥

## नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः। (५१/३४०५)

'ऊन परिहाणे' (धा. पा. १८८९), 'ध्वन शब्दे' (धा. पा. ८१७), 'इल प्रेरणे' (धा. पा. १३५८), 'अर्द गतौ याचने च' (धा. पा. ५५), एतेभ्यो धातुभ्यः ण्यन्तेभ्यः [3]पूर्वेण च्लेश्चङि प्राप्ते छन्दसि विषये न भवति। 'काममूनयीः' (ऋ. १.५३.३)। [4]औनिनः इति भाषायाम्। 'मा त्वाग्निर्ध्वनयीत्' (ऋ. १.१६१.१५)। अदिध्वनत् इति भाषायाम्। [5]काममैलयीत्। ऐलिलत् इति भाषायाम्। मैनमर्दयीत्। [6]आर्दिदत् इति भाषायाम्॥

## अस्यतिवक्तिख्यातिभ्योऽङ्। (५२/२४३८)

'असु क्षेपणे' (धा. पा. १२१०), 'वच परिभाषणे' (धा. पा. १०६४) ब्रूञादेशो वा (२.४.५३/२४५३), 'ख्या प्रकथने' (धा. पा. १०६१) चक्षिङादेशो वा (२.४.५४/२४३६), एभ्यः परस्य च्लेरङादेशो भवति कर्तृवाचिनि लुङि परतः। अस्यतेः पुषादिपाठादेवाङि सिद्धे [7]पुनर्ग्रहणमात्मनेपदार्थम् (म. भा. २.५५)। [8]पर्यास्थत, पर्यास्थेताम्, पर्यास्थन्त। वक्ति – अवोचत्, अवोचताम्, अवोचन्। ख्याति – [9]आख्यत्, आख्यताम्, आख्यन्। [10]कर्तरि इति किम्? पर्यासिषातां गावौ वत्सेन॥

## लिपिसिचिह्वश्च। (५३/२४१८)

'लिप उपदेहे' (धा. पा. १४३४), 'षिच क्षरणे' (धा. पा. १४३५), 'ह्वेञ् स्पर्धायाम्' (धा. पा. १००९), एतेभ्यश्च परस्य च्लेः अङ आदेशो भवति। अलिपत्। असिचत्। आह्वत्। [11]पृथग्योग उत्तरार्थः॥

## आत्मनेपदेष्वन्यतरस्याम्। (५४/२४१९)

पूर्वेण[12] प्राप्ते विभाषा आरभ्यते। लिपिसिचिह्व आत्मनेपदेषु परतः च्लेः अङादेशो भवति अन्यतरस्याम्। 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (१.३.७२/२१५८) इत्यात्मनेपदम्। अलिपत, अलिप्त। असिचत, असिक्त। अह्वत, अह्वास्त॥

---

1. उदाहरणमिदं नास्ति ह. 2. अगोप्तम् ह. 3. चङ आदेशः प्राप्तः प्रतिषिध्यते अ.क.ह. 4. कामानौनयीत् अ. 5. कामैमलयीः ब.क.ड. 6. आर्दिदीत् अ. 7. पुनर्वचनम् ग. 8. पर्यास्थित अ. 9. आख्यात् आख्याताम् अ. ब. ड. 10. वाक्यमिदं नास्ति ग. 11. पृथग्योगकरणमुत्तरार्थम् अ.क.ड.ह. 12. नित्ये इत्यधिकम् क.ड.